# .. ga.ngAShTottara shatanAmAvaliH ..

# ॥ गंगाष्टोत्तर शतनामावलिः ॥

ॐ गंगायै नमः ।
ॐ विष्णुपादसंभूतायै नमः ।
ॐ हरवल्लभायै नमः ।
ॐ हिमाचलेन्द्रतनयायै नमः ।
ॐ गिरिमण्डलगामिन्यै नमः ।
ॐ तारकारातिजनन्यै नमः ।
ॐ सगरात्मजतारकायै नमः ।
ॐ सरस्वतीसमयुक्तायै नमः ।
ॐ सुघोषायै नमः ।
ॐ सिन्धुगामिन्यै नमः ।१०
ॐ भागीरत्यै नमः ।
ॐ भाग्यवत्यै नमः ।
ॐ भगीरतरथानुगायै नमः ।
ॐ त्रिविक्रमपदोद्भूतायै नमः ।
ॐ त्रिलोकपथगामिन्यै नमः ।
ॐ क्षीरशुभ्रायै नमः ।
ॐ बहुक्षीरायै नमः ।
ॐ क्षीरवृक्षसमाकुलायै नमः ।
ॐ त्रिलोचनजटावासायै नमः ।
ॐ ऋणत्रयविमोचिन्यै नमः ।२०
ॐ त्रिपुरारिशिरःचूडायै नमः ।
ॐ जाह्नव्यै नमः ।
ॐ नरकभीतिहृते नमः ।
ॐ अव्ययायै नमः ।
ॐ नयनानन्ददायिन्यै नमः ।
ॐ नगपुत्रिकायै नमः ।
ॐ निरञ्जनायै नमः ।
ॐ नित्यशुद्धायै नमः ।
ॐ नीरजालिपरिष्कृतायै नमः ।
ॐ सावित्र्यै नमः ।३०
ॐ सलिलावासायै नमः ।
ॐ सागरांबुसमेधिन्यै नमः ।
ॐ रम्यायै नमः ।
ॐ बिन्दुसरसे नमः ।
ॐ अव्यक्तायै नमः ।
ॐ अव्यक्तरूपधृते नमः ।
ॐ उमासपत्न्यै नमः ।
ॐ शुभ्राङ्गायै नमः ।
ॐ श्रीमत्यै नमः ।
ॐ धवलांबरायै नमः ।४०
ॐ आखण्डलवनवासायै नमः ।
ॐ कंठेन्दुकृतशेकरायै नमः ।
ॐ अमृताकारसलिलायै नमः ।
ॐ लीलालिंगितपर्वतायै नमः ।
ॐ विरिञ्चिकलशावासायै नमः ।
ॐ त्रिवेण्यै नमः ।
ॐ त्रिगुणात्मकायै नमः ।
ॐ संगत अघौघशमन्यै नमः ।
ॐ भीतिहर्त्रे नमः ।
ॐ शंखदुंदुभिनिस्वनायै नमः ।५०
ॐ भाग्यदायिन्यै नमः ।
ॐ नन्दिन्यै नमः ।
ॐ शीघ्रगायै नमः ।
ॐ शरण्यै नमः ।
ॐ शशिशेकरायै नमः ।
ॐ शाङ्कर्यै नमः ।
ॐ शफरीपूर्णायै नमः ।
ॐ भर्गमूर्धकृतालयायै नमः ।
ॐ भवप्रियायै नमः ।६०
ॐ सत्यसन्धप्रियायै नमः ।
ॐ हंसस्वरूपिण्यै नमः ।
ॐ भगीरतभृतायै नमः ।
ॐ अनन्तायै नमः ।
ॐ शरच्चन्द्रनिभाननायै नमः ।
ॐ ओंकाररूपिण्यै नमः ।
ॐ अनलायै नमः ।
ॐ क्रीडाकल्लोलकारिण्यै नमः ।
ॐ स्वर्गसोपानशरण्यै नमः ।
ॐ सर्वदेवस्वरूपिण्यै नमः ।७०
ॐ अंबःप्रदायै नमः ।
ॐ दुःखहन्त्र्यैनमः ।
ॐ शान्तिसन्तानकारिण्यै नमः ।
ॐ दारिद्र्यहन्त्र्यै नमः ।
ॐ शिवदायै नमः ।
ॐ संसारविषनाशिन्यै नमः ।

ॐ प्रयागनिलयायै नमः ।
ॐ श्रीदायै नमः ।
ॐ तापत्रयविमोचिन्यै नमः ।
ॐ शरणागतदीनार्तपरित्राणायै नमः ।८०
ॐ सुमुक्तिदायै नमः ।
ॐ पापहन्त्र्यै नमः ।
ॐ पावनाङ्गायै नमः ।
ॐ परब्रह्मस्वरूपिण्यै नमः ।
ॐ पूर्णायै नमः ।
ॐ पुरातनायै नमः ।
ॐ पुण्यायै नमः ।
ॐ पुण्यदायै नमः ।
ॐ पुण्यवाहिन्यै नमः ।
ॐ पुलोमजार्चितायै नमः ।९०
ॐ भूदायै नमः ।
ॐ पूतत्रिभुवनायै नमः ।
ॐ जयायै नमः ।
ॐ जंगमायै नमः ।
ॐ जंगमाधारायै नमः ।
ॐ जलरूपायै नमः ।
ॐ जगद्धात्र्यै नमः ।
ॐ जगद्भूतायै नमः ।
ॐ जनार्चितायै नमः ।
ॐ जह्नुपुत्र्यै नमः ।१००
ॐ जगन्मात्रे नमः ।
ॐ जंभूद्वीपविहारिण्यै नमः ।
ॐ भवपत्न्यै नमः ।
ॐ भीष्ममात्रे नमः ।
ॐ सिक्तायै नमः ।
ॐ रम्यरूपधृते नमः ।
ॐ उमासहोदर्यै नमः ।
ॐ अज्ञानतिमिरापह्रते नमः ।१०८
॥ॐ तत्सत्॥
॥श्री गंगाष्टोत्तर शतनामावलिः संपूर्णा॥

Endoded by N. Balasubramanian bbalu@satyam.net.in

Please send corrections to sanskrit@cheerful.com
Last updated June 17, 2004